Original Research Paper | Sanskrit | Volume : 4 ¦ Issue : 5 ¦ May 2019 ¦ e-ISSN : 2456-5040

# Sarjnatmakta : Ek Drusthi

# सर्जनात्मकता : एका दृष्टि

**Manikadas**

Researcher, Department of Education, National Sanskrit Institute (University Approved), Lucknow Campus, Lucknow, India.

'सर्जनात्मकता' कल्पनाशीलतायाः पर्यायोऽस्ति। सर्जनात्मकता मानवस्य क्रियाकलापानां निष्पत्तेश्च कृते आवश्यकी वर्तते। कस्या अपि व्यक्तेः क्रियायां सृजनात्मकता सुलभाऽस्ति, समाजे कार्यकर्तृणां व्यक्तीनां कार्ये व्यवसाये वा सृजनात्मकता दृश्यते, प्रतिव्यक्तिं सर्जनस्याऽऽनन्ताः संभावनाः भवन्ति यासाञ्च विकासकरणम् आवश्यकमस्ति।

मानवजीवने नानापरिवर्तनानि समागच्छन्ति, प्रतिपदं समस्यानां साक्षीकरणम् आवश्यकमस्ति। नूतनानां परिस्थितीनां समाधानं तदैव संभवमस्ति यदा छात्रेषु सर्जनशक्तिः सर्जनप्रतिभा च विकसेत्।

सर्जनात्मकतामुपरि विभिन्नविदुषां भिन्नं भिन्नं मतमस्ति। वैज्ञानिकदृष्टियुक्तः एकः मनोवैज्ञानिकः मनुते यत् प्रयोगशालायां कार्यकर्तृजन एव सर्जनशीलो मानवोऽस्ति, यतः सैव प्रकृतिं नवदृष्टिकोणेन संदृश्य तस्याः मौलिकीं विवेचनां करोति। एकः अभियन्ता चिन्तयति यत् स एव सर्जनशीलोऽस्ति, यतः स एव प्राकृतिकस्त्रोतांसि मौलिकरूपेणोपयुज्यति। चिकित्सकानुसारं स एव मौलिकः भवति, यतः स एवास्मान् प्राकृतिकेभ्यो, प्राकृतिकेभ्योश्च रोगेभ्यः विमोचयति। कृषकः सृजनशील एव, यतः सः प्रकृतिं सहकृत्य पृथिवीतोऽन्नप्राप्तेः मौलिककार्यं करोति। एवमेव शिक्षकः सर्जनशीलोऽस्ति, यः प्रकृतिप्रदत्तान् मूल प्रवृत्ति-जन्मव्यवहारान् परिमार्ज्य तान् सामाजिकस्वरूपं ददाति, एकः विद्यार्थी अपि स्वयं सर्जनशील इति मनुते।

सर्जनशीलतासन्दर्भे विभिन्नविचाराः दृष्टिकोणाश्च वर्तन्ते। एतदतिरिच्य केचिदेतां कल्पनादृष्ट्यापि पश्यन्ति, केचिच्चिन्तनदृष्ट्या, केचिदुत्पादनदृष्ट्या, केचिन्मौलिकतादृष्ट्या केचिच्च कार्यदृष्ट्या सर्जनशीलतां व्याख्यायन्ति।'सर्जनात्मकता' इति शब्दः आङ्ग्ले "क्रिएटिविटी" एवमस्ति, शब्दस्यास्य पर्यायशब्दाः विधायकता, उत्पादनम्, रचनात्मकता, 'डिस्कवरी' इत्यादिशब्दाः सन्ति। 'फादर कामिल बुल्के' इत्येषः क्रिएटिव शब्दस्य पर्यायशब्दाः सर्जनात्मकः ,रचनात्मकः, सर्जकः इति शब्दान् अवदत्। डा. रघुवीरश्चास्यार्थः सृजनम्, जननम् इति स्वीकृतः।

प्रो. सुरेशभटनागरस्यानुसारं "यद्यपि सर्जनात्मकता कलाकाराणां जीवनेऽधिकव्याप्ता भवति, लेखकः-चित्रकारः-कविः-विद्वान्- अभिनेतादिषु सर्जनशीलता विद्यत एव, यदि वातावरणमस्य युगस्य विकासानुकूलं भवेत् तर्हि व्यक्तेः क्षमतायाः मौलिकविकासः भवति। भारते किशोरेषु निहितसर्जनशीलताविकासस्य अभावात् सहस्राणि, लक्ष्याणि प्रतिभासम्पन्नबालकाः विकसिताः न भवन्ति, येन राष्ट्रस्य हानिर्जायते।

एतत् प्राप्तं यत् सर्जनात्मकताविकासस्य पाठ्यसहगामीक्रियाणां विकासोऽप्यावश्यकोऽस्ति। एतस्य कृते कक्षायां सम्यग्विभाजनं भवेत्, विज्ञानस्य गणितस्य च समूहाः हिन्द्याः आङ्ग्लभाषायाः संस्कृतस्य च समूहाः निर्मातव्याः। 'बुलेटिनबोर्ड' विद्यालयपत्रिका, पुस्तकालयः, साहित्यिकाः, वाद-विवादश्च सभाः, परिभ्रमणं सरस्वतीयात्राश्च, 'स्काउटिंग', एन.सी.सी. (रा.कै.को.) सहकारीभण्डारगृहं, सामूहिककार्याणि, क्रीडादिविकासमाध्यमेन च सर्जनात्मकतायाः विकासः संभवोऽस्ति।

Copyright© 2019, IEASRJ. This open-access article is published under the terms of the Creative Commons Attribution-NonCommercial 4.0 International License which permits Share (copy and redistribute the material in any medium or format) and Adapt (remix, transform, and build upon the material) under the Attribution-NonCommercial terms.

सी.भी. गुड महोदयानुसारं- "सर्जनात्मकता कस्मिन्नपि समूहे विस्तृतसार्थकतां निर्माति। सर्जनात्मकतायाः कारकाणि भवन्ति साहचर्यम्, आदर्शात्मकमौलिकता, अनुकूलता, सातत्यता, तार्किकविश्वासस्य योग्यता च"।

(A quality of thought to be composed of broad continue upon which all members of the population may be placed indifferent degrees, the factors of creativity are tentatively described as associate and ideational fluency, originality adaptive and spontaneous flexibility and ability to make logical evolution.)- C.P. Good

क्रो. एवं क्रो महोदययोः अभिमतं यत्- "सर्जनात्मकता मौलिकपरिणामानाम् अभिव्यक्तकरणस्य मानसिक- प्रक्रियाऽस्ति"।

(Creativity is a mental process to express the original outcomes.)- Crow & Crow.

एताभिः परिभाषाभिः सर्जनात्मकता का इति स्पष्टा जाता। एवञ्च सर्जनात्मकतायाः विवरणम् अनेकेषु आयामेषु कर्तुं शक्यते। ते आयामाः अधः प्रस्तूयन्ते-

1. संवेदनशीलता
2. वैशिष्टता
3. मौलिकता
4. व्यावहारिकता
5. परिणामः
6. परिणामः एवं प्रक्रिया
7. रूपप्रक्रियात्मकसंश्लेषणम्

## सर्जनात्मकतायाः महत्वम्

परिभाषाणामाधारे सर्जनात्मकतायाः निम्नाङ्कितमहत्वं स्पष्टं भवति-

1. सर्जनात्मकतायां मौलिकता अवश्यं भवति।
2. सर्जनात्मकता नवीनता विद्यते।
3. अस्याम् उच्चबौद्धिकयोग्यता वर्तते।
4. सर्जनशीलतायाः नमनीयता प्रमुखवैशिष्ट्यम्।
5. सर्जनशीलतायाः ज्ञानं समस्यायाः उपस्थितौ भवति।
6. सर्जनात्मकतायां कल्पना तथा कल्पनायाः सत्यतापरीक्षणाय काचित् शक्तिः वर्तते।
7. सर्जनशीलतायाः बहूनि क्षेत्राणि भवन्ति।

## सर्जनात्मकतायाः कारकाणि

सर्जनात्मकतायाः विकासाय निम्नलिखितानि तत्वानि आवश्यकानि भवन्ति। तान्यथा-

1. **मापनयोग्यव्यवहारः-** सर्जनात्मकतायाः महत्वपूर्णकारकं वर्तते मापनयोग्यव्यवहारः। व्यक्तेः सर्जनात्मकतायाः ज्ञानं तदा भवति यदा तस्य विविधव्यवहाराणां वस्तुनिष्ठविश्वसनीयवैधविधिभिः मापनं भवति। अमानवीयव्यवहारस्य ज्ञानम् असम्भवम्। अतः

तेषाम् अध्ययनमपि सम्भवो न भवति।

2. **माध्यमम्:-** सर्जनात्मकतायाः किमपि माध्यमम् अवश्यमेव आवश्यकम्। यतः व्यक्तिः अनेन स्वकीयसर्जनात्मकतां प्रदर्शयति। चिन्तनतर्ककल्पना स्थूलकार्यलेखनवाचनाध्ययनादि क्रियाभिः व्यक्तिः स्वकीयसर्जनात्मकतां प्रदर्शयति। एतेषां मापनेन एव व्यक्तीनां सर्जनात्मकतायाः ज्ञानं भवति।

3. **बौद्धिकस्तरः-** सर्जनात्मकशक्तये उच्चबौद्धिकस्तरस्य आवश्यकता भवति। परम्परागतविचारान् विहाय नवीन मौलिकचिन्तनं केवलम् उच्चबौद्धिकस्तरसम्पदा व्यक्तिना एव सम्भवति। परन्तु उच्चबौद्धिकस्तरसम्पन्नाः सर्वे जनाः सर्जनशीलाः भवन्तीति वक्तुं न शक्यते।

4. **मौलिकता नवीनता चः-** सर्जनशीलतायै मौलिकनवीनरीत्या च कार्य सम्पादनस्य योग्यता आवश्यकी भवति। सर्जनात्मकता तत्र भवति यत्र कार्ये मौलिकता सत्वेऽपि नवीनता भवति।

5. **सामाजिकस्वीकृतिः-** किञ्चित् कार्यं विचारः वा सर्जनात्मकतायाः उपाधिं तदा प्राप्नोति यदा समाजे गृहीतः भवति। यदि कोऽपि चौरः नवीनतया तथा मौलिकरूपेण चौरकार्यं सम्पादयति तर्हि तद् कार्यं सृजनात्मकं न भवति।

6. **प्रवीणता:-** कोऽपि व्यक्तिः तावत् पर्यन्तं किमपि सर्जनात्मककार्यं कर्तुं न शक्नोति यावत् पर्यन्तं तस्मिन् विषये तस्य प्रवीणता सिद्धान्ता वा भवति। अतः मौलिकं तथा नवीनविषयोद्भावने विषये प्रवीणता आवश्यकी।

7. **उपयुक्तक्षेत्रम्: -** सर्जनात्मकताप्रदर्शनार्थं सर्वप्रथमे उपयुक्तक्षेत्रस्य आवश्यकता वर्तते। उपयुक्तक्षेत्रमेव सर्जनात्मकतां प्रबलयति। अतः सर्जनात्मकतायाः कृते उपयुक्तक्षेत्रम् आवश्यकम्।

8. **साहसः-** सर्जनशीलतायाः अन्तिमं प्रमुखाधारो भवति व्यक्तेः साहसः नवीनरूपेण कार्यसम्पादनाय प्रारम्भिकी असफलता बाधते। प्रारम्भिकसफलतया हतोत्साहितः सन् व्यक्तिः यदि कार्यं नैव प्रारम्भते तर्हि सर्जनशीलतायां कुण्ठा आयाति। अतः समागतानां काठिन्यानां समस्यानां च ससाहसपूर्वकं सम्मुखीकरणैव सर्जनात्मककार्यस्योत्पत्तिः।

## सर्जनात्मकतायाः आवश्यकता

सर्जनात्मकतायाः निम्नावश्यकताः वर्तन्ते-

1. सर्जनात्मकता वैयक्तिकशिक्षणे सहायिका भवति।
2. सर्जनात्मकता कक्ष्यायां निदानात्मककार्यक्रमस्य प्रबन्धने सहायिका भवति।
3. एषा मानवस्य मनः व्यक्तित्वञ्च अवबोधनाय सहायिका विद्यते।
4. एषा बोधात्मकसौन्दर्यात्मकविकासस्य निर्देशने साहाय्यं करोति।

## सर्जनात्मकतायाः तत्वानि

सर्जनात्मकतायाः तत्वानि Guilford महोदयः प्रतिपादयति यत्-

- **तात्कालिकस्थित्यान्तरम् अग्रसरणयोग्यता-** व्यक्तिः वर्तमानपरिस्थितिं त्यक्त्वा ततः अग्रिमविषयं चिन्तयति, मृतरूपञ्च प्रददाति। तस्मिन् व्यक्तौ सर्जनात्मकतत्वानि प्राप्यन्ते।
- **समस्यायाः पुनर्व्याख्या-** समस्यायाः पुनर्व्याख्या सर्जनात्मकतायाः तत्वेषु अन्यतमतत्वम्। प्रायशः

विचारकेषु, अध्यापकेषु, नेतृषु, व्याख्यातृषु सृजनात्मकता प्राप्यते। एते समस्यायाः व्याख्या स्वरीत्या कुर्वन्तीति संल्लक्ष्यते।

- **सामञ्जस्यम्-** यः बालकः व्यक्ति वा असामान्योऽस्ति, परन्तु प्रसङ्गवशात् तथ्यैः साकं समन्वयं स्थापयति, सः सृजनात्मकः इत्यभिधीयते।
- **अन्यविचारेषु परिवर्तनम्-** यस्मिन् व्यक्तौ सर्जनात्मकता विद्यते, सः तर्केण चिन्तनेन प्रमाणेन च अपरव्यक्तेः विचारं प्रदर्शयति।

### सर्जनात्मकतायाः सिद्धान्ताः

सर्जनात्मकतायाः सिद्धान्ताः चतुर्धा विभज्यन्ते। तद्यथा-

1. **मनोविश्लेषणात्मकसिद्धान्तः-** सिद्धान्तस्य आधारः सिग्मण्डफ्रायड्- जुङ्गमहोदययोः धारणैव अस्ति। कथनस्याभिप्रायः यत् रुचेः सशक्तविचलनं प्रतिस्थापनम् उत्तेजनात्मकोपादानञ्च व्यक्तिं नवीनकार्याय प्रेरयति। पूर्वचेतनायाः विकासोपरि सर्जनात्मकता निर्भरति।
2. **साहचर्यवादसिद्धान्तः-** सर्जनात्मकता संयोगानां पुनर्गठनमस्ति। निर्भरता समानता मध्यस्थताभ्यश्च साहचर्यं सर्जनात्मकतायै उत्तरदायिनि भवति।
3. **अन्तर्दृष्टिवादसिद्धान्तः-** सर्जनात्मकचिन्तनं समस्यासमाधानादीनां विषयाणाम् आलोचनासन्दर्भे वर्दीमरमहोदयः अवबोधोपरि बलं प्रदत्तवान्। तस्य मतानुगुणं सर्वाः प्रक्रियाः चिन्तनस्य अविभाज्यरेखाः सन्ति। एषा विभक्तपदार्थानां न केवलमेकत्रीकरणमस्ति, अपि तु कमपिपदं कार्येऽस्मिन् आवश्यकं तथा च अवबोधयुक्तं न भवति। प्रत्येकं पदं सर्वेषां स्थितीनां सर्वेक्षणं विदधाति।
4. **अस्तित्ववादसिद्धान्तः-** मिलनसामञ्जस्ययोः विश्वसति अस्तित्ववादः। सर्जनात्मकता एका प्रक्रियाऽस्ति, एकं कार्यं विशेषरूपेण व्यक्तिना साकं संसारबन्धनस्य प्रक्रिया चेति अस्तित्ववादीनः स्वीकुर्वन्ति।

### सृजनशीलतायाः सिद्धान्ताः अन्यरूपेण व्याख्या भवितुं शक्नोति। तद् निम्नवत्-

1. **जन्मजातशक्तेः सिद्धान्तः-** सिद्धान्तानुसारेण सृजनात्मकशक्तिः जन्मजाता तथा प्रकृतिप्रदत्ता च भवति, यस्याधारेण सृजनशीलः व्यक्तिः महान् कार्यं साधयति।
2. **स्वप्रेरणायाः सिद्धान्तः-** केचन पण्डिताः एतद् मतं प्रतिपादितवन्तः यत् सृजनात्मकता स्वप्रेरणायाः परिणामः वर्तते। अनेन सिद्धान्तानुसारेण केचन जनाः किमपि कार्यं नवीनतया मौलिकरूपेण सम्पादनाय स्वयमेव प्रेरितः, एवम् एषा प्रेरणा तान् सृजनशीलकार्याय प्रेरयति।
3. **प्रतिष्ठायाः सिद्धान्तः-** केचन जनाः एतदर्थं सृजनशीलकार्ये प्रेरिताः भवन्ति येन ते समाजे प्रतिष्ठिताः भवितुं शक्नुवन्ति।प्रतिष्ठापनस्य इयं प्रचेष्टा नवीना, मौलिककार्यसम्पादने च सहायकी भवति।
4. **इच्छाशक्तेः सिद्धान्तः-** सिद्धान्तस्यास्य प्रचारः ऊनविंशति शताब्द्यां प्रचलितः इति मन्यते। अस्यानुसारं व्यक्तिः एतदर्थं सृजनात्मककार्यं करोति यतः तद्कार्यं सम्पादनाय तस्य प्रबला इच्छा भवति।

## सृजनात्मकतायाः विकासावस्था

सृजनात्मकतायाः तथा च सृजनात्मकचिन्तनस्य विकासावस्थाः निम्नलिखिताः सन्ति। तद्यथा-

1. **प्रस्तुतीकरणम्-** प्रथमावस्थायां विचारकः स्व समस्या स्पष्टयति। समाधानाय यत् आवश्यकं तेषां सामग्रीणां तथ्यानाञ्च एकत्रीकरणे सः समर्थो भवति। अस्यामवस्थायां व्यक्तिभिः प्रदत्ता सुव्यवस्था विधीयते। समस्यापरिभाषीकरणाय प्रासङ्गिकविचाराणां, तथ्यानां, सामग्रीणां विभिन्नांशानाञ्च संयोजनं समुचितरीत्या क्रियते। अनेन लक्ष्यप्राप्तिं भवति। व्यक्तौ बाले वा सृजनस्य अन्तःप्रेरणा समुत्पाद्यते।

2. **उद्भावनम्-** यत्र व्यक्तिः बालकः वा स्व विचारान् व्यवस्थापयति, पुनर्व्यवस्थापयति, परीक्षणं विदधाति च, सैवावस्था उद्भावनमित्युच्यते। एषा अवस्था समस्या समाधानविषयककाल्पनिकचिन्तनस्य व्यवस्था अस्ति। अत्रत्य सङ्केतेन सः समस्या समादधाति। अवस्थेयम् अचेतनस्तरोपरि समस्यायाः समाधानं करोति।

3. **उद्भासनम्-** अस्याम् अवस्थायाम् अन्तर्दृष्टेः अनुभवः विचारकैः क्रियते। झटिति समाधानमुद्भाषितं भवति। अस्याम् अवस्थायां व्यक्तिः सहसा समस्यायाः प्रमुखविषयान् अधिगच्छति। एवञ्च विविधसम्बन्धानां प्रत्यक्षणं करोति। अनेके सृजनशीलव्यक्तयः एवं स्वीकुर्वन्ति यत् सृजनात्मकविचारः सहसा उदेति।

4. **मूल्याङ्कनम्-** सम्पूर्णप्रयत्नानां मूल्याङ्कनमस्याम् अवस्थायां भवति। बहुधा त्रुटियुक्ते सति विचारकाः पुनः तं बिन्दुं विचारयन्ति, यतः तेन प्रारम्भं कृतम्।

5. **पुनरावर्तनम्-** मूल्याङ्कनानन्तरं यदि कुत्रापि परिवर्तनम् अपेक्षितं भवति अथवा समस्या समाधानस्य उपेक्षा भवति, तर्हि पुनर्निरीक्षणं पुनरावर्तनं क्रियते।

## सर्जनात्मकतायै छात्राणां शैक्षिकव्यवस्था

विद्यालयीयबालकानां सृजनात्मकशक्तियोग्यता विकासार्थं समुचितपरिस्थितिः समुचितवातावरणं वा निर्मीयते। तदेव आवश्यकं भवति यत् बालकेषु स्थितानां सृजनात्मकशक्तीनां योग्यतानां वा विकासः परमावश्यकोऽस्ति। विद्यालयीयबालकेभ्यः स्वतन्त्रचिन्तनाय अवसरः प्रदातव्यः। एवञ्च सृजनात्मकतायाः विकासार्थम् अधोलिखिताः विधयः अनुसर्तव्याः। ते विधयः यथा-

1. Brain storming method
2. विस्तारविधिः
3. कल्पना
4. सृजनात्मक-कलात्मकाभिव्यक्तीनां प्रोत्साहनम्
5. सादृश्यानाम् अनुप्रयोगः
6. परिणामविषये चिन्तनम्
7. अपसारीचिन्तनम्

## सर्जनात्मकतायाः विकासाय स्थितयः

सर्जनात्मकतायाः विकासार्थम् अनुकूलवातावरणम् अत्यावश्यकम्। तत्र एतादृशस्थितयः भवन्ति-

1. आत्मविश्वासः

2. अभिव्यक्तेः अवसरः
3. मानसिकस्वास्थ्यम्
4. आत्ममूल्याङ्कनम्
5. आत्मप्रेरणा

संस्कृतं न केवलम् एका भाषा अपितु समृद्धमेकं शास्त्रमपि वर्तते। शास्त्रेऽस्मिन् विभिन्नसमये अनेकानि सर्जनात्मककार्याणि अभवन्। तान्यथा- अक्षराणां वर्णानां वा उच्चारणस्थलविषये, वाक्यनिर्माणे, विविधसूत्रप्रयोगेन, व्याकरणस्य शुद्धप्रयोगविषये, साहित्यनिर्माणे च। महर्षिपाणिनि माहेश्वरसूत्रे अक्षराणाम् उच्चारणशैली, भाषायां व्याकरणस्य प्रयोगविषये विस्तृतरूपेण अवदत्। महाकवि वाल्मीकिरचितरामायणम् एवं महर्षिवेदव्यासरचितमहाभारतम् अस्माकं हिन्दुधर्मस्य पवित्रग्रन्थः अपि च प्राणस्वरूपा तदेव संस्कृतभाषाविरचिता। अपौरुषेय वेदशास्त्रमपि भारतीयसंस्कृतिं प्रतिपादयितुं संस्कृतभाषामाश्रिता। समाजे आदर्शमानवरूपेण कथं स्थातव्यं तदेव विभिन्नैः नीतिवाक्यैः वयं ज्ञातुं शक्नुमः। इत्येतानि नीतिवाक्यान्यपि संस्कृतेन रचितानि। अतः संस्कृतभाषा अमृततुल्या, सुधास्वरूपा च। अनया मनःसु समग्रकलुषता दूरीकृता भवति। इयं सर्वदा मौलिकसाहित्यनिर्माणे प्रतिभावनम् आनयति प्रापयति च। वास्तविकपक्षे अस्यां भाषायां यद् किमपि विरचितं, तत्क्षणादेव सा रचना मौलिकरचना तथा च सर्जनशीलरचना भवति स्म। एतादृशी महिमा धारयती संस्कृतभाषा। इदानीम् अस्यां भाषायां पठनरतेषु छात्रेषु सर्जनात्मकशक्तिः कियत् अस्ति तस्य ज्ञानाय प्रयत्नः करणीयः।

## सन्दर्भग्रन्थसूची


1. शर्मा, आर.ए. –शिक्षा मनोविज्ञान के मूलतत्व- आर .लाल. बुक डिपो, मेरठ
2. वघेला, डाँ.एच.एम.- अधिगम एवं विकास के सामाजिक आधार -राजस्थान प्रकाशन,जयपुर-2006
3. रजोरिया ,अरुण कुमार - अधिगमकर्ता का विकास शिक्षण एवं अधिगम का मनोविज्ञान- श्रीकविता प्रकाशन, जयपुर -2007
4. बैस,डाँ.नरेन्द्र सिंह ,संजय दत्ता एवं चतुर्वेदी, डाँ.शुभ्रा -अधिगम का मनोसामाजिक आधार एवं शिक्षण - जैनप्रकाशन मन्दिर, जयपुर -2007
5. मिश्रः,डाँ.लोकमान्य -आधुनिकं शिक्षामनोविज्ञानम्- मृगाक्षिप्रकाशनम्,लखनऊ -2005
6. गुप्ता ,एस.पि.- उच्चतर शिक्षा मनोविज्ञान - शारदा पुस्तकभवन,इलाहाबाद -2004
7. शर्मा, डाँ.आर् .ए -शिक्षा मनोविज्ञान का मूलतत्व- आर्.लाल बुक् डिपो,निकट गभर्नमेण्ट काँलेज, बेगम ब्रिज रोड, मेरठ -
8. माथुर ,डाँ.एस. एस- शिक्षा मनोविज्ञान- अग्रवाल पब्लिकेशन्स, हस्पताल रोड, आगरा-2